# Dvijakrita Shiva Stuti 1

# દ્વિજકૃતા શિવસ્તુતિઃ ૧

## Document Information

Text title : Dvijakrita Shiva Stuti 1

File name : dvijakRRitAshivastutiH1.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 23| 622-637||

See corresponding nAmAvalI

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 21, 2024

*sanskritdocuments.org*

# દ્વિજકૃતા શિવસ્તુતિઃ ૧

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

- -

સ્વસ્વરૂપં કૃપાસિન્ધુર્દર્શયામાસ સત્વરમ્ ।
ઉમાસંશ્લિષ્ઠવામાઙ્ગં ચન્દ્રશેખરમીશ્વરમ્ ॥ ૬૨૨॥

દૃષ્ટ્વા પ્રહૃષ્ટહૃદયસ્તુષ્ટાવાષ્ટવિધાકૃતિમ્ ॥ ૬૨૩॥

- -

દ્વિજઃ -
નમસ્તે પૃથિવીરૂપ નમસ્તે જલરૂપિણે ।
નમસ્તેજઃસ્વરૂપાય વાયુરૂપાય તે નમઃ ॥

નમ આકાશરૂપાય સૂર્યરૂપાય તે નમઃ ॥ ૬૨૪॥

નમશ્ચન્દ્રસ્વરૂપાય નમો યજ્વરૂપિણે ।
નમઃ સર્વસ્વરૂપાય વ્યાપકાય નમો નમઃ ॥ ૬૨૫॥

નમસ્ત્રિશૂલહસ્તાય નમઃ પરશુધારિણે ।
નમો વિધૂતપાપાય ગૌરીનાથાય તે નમઃ ॥ ૬૨૬॥

નમશ્ચન્દ્રકિરીટાય પરમાય નમો નમઃ ।
નમો વેદસ્વરૂપાય નીરૂપાય નમો નમઃ ॥ ૬૨૭॥

નમો વેદાન્તવેદ્યાય ભવવૈદ્યાય તે નમઃ ।
નિષ્કલાય નમસ્તેઽસ્તુ નિર્ગુણાય નમો નમઃ ॥ ૬૨૮॥

નમઃ શાન્તાય તે શમ્ભો નિરવદ્યાય તે નમઃ ।
નિરઞ્જન નમસ્તેઽસ્તુ નિષ્પ્રપઞ્ચ નમો નમઃ ॥ ૬૨૯॥

નિર્લિપ્તાય નમસ્તેઽસ્તુ નિરાધારાય તે નમઃ ।
નિરીશાય નમસ્તેઽસ્તુ સર્વેશાય નમો નમઃ ॥ ૬૩૦॥

નમો જ્ઞાનસ્વરૂપાય જ્ઞાનાતીતાય તે નમઃ ।
નમો જ્ઞાનૈકગમ્યાય ધ્યાનગમ્યાય તે નમઃ ॥ ૬૩૧॥

નમઃ પરમરૂપાય પરમાનન્દરૂપિણે ।
સચ્ચિદાનન્દરૂપાય નમસ્તે સર્વસાક્ષિણે ॥ ૬૩૨॥

નમો યજ્ઞસ્વરૂપાય યજ્ઞકર્મફલપ્રદ ।
નમસ્તે કરુણાસિન્ધો કરુણામૂર્તયે નમઃ ॥ ૬૩૩॥

અનન્તસોમસૂર્યાગ્નિપ્રતિમાય નમો નમઃ ।
અનન્તામેયકલ્યાણગુણપૂર્ણાય તે નમઃ ॥ ૬૩૪॥

સર્વજ્ઞાય નમસ્તેઽસ્તુ ભક્તાભીષ્ટપ્રદાય ચ ।
ભૂતભાવન ભૂતેશ નમસ્તે ભક્તવત્સલ ॥ ૬૩૫॥

ભૂતવ્રતપ્રિય શ્રીમન્નમસ્તે ભૂતિભૂષણ ।
ભૂતિભૂષિતભક્તેષ્ટભૂતિદાનવિચક્ષણ ॥ ૬૩૬॥

અભયપ્રદ વિશ્વાત્મન્વરદામરપૂજિત ।
વિષ્ણુબ્રહ્માર્ચિતેશાન પ્રસીદ ગિરિજાપતે ॥ ૬૩૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે દ્વિજકૃતા શિવસ્તુતિઃ ૧ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૩ । ૬૨૨-૬૩૭ ॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 23 . 622-637..

Notes:
Dvija દ્વિજ eulogizes Śiva શિવ as he receives His Darśana દર્શન.
The Dvijakṛtā Śivastutyāntargate ŚivaNāmāvaliḥ દ્વિજકૃતા શિવસ્તુત્યન્તર્ગતે શિવનામાવલિઃ ૧ that has been derived from this Stutiḥ સ્તુતિઃ that can be referred to from the link given below.

Proofread by Ruma Dewan

*Dvijakrita Shiva Stuti 1*

pdf was typeset on June 21, 2024

Please send corrections to *sanskrit@cheerful.com*